दिति किंवदन्तीति हेमाद्रिधृतलक्षणकाण्डे ॥
सूतसंहितायान्तु ।
“सप्तकृत्वस्तुलारूढं वृद्धिमेति न हीयते ।
बाणलिङ्गमिति ख्यातं शेषं नार्म्मदमुच्यते ॥
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शेषं पाषाणसम्भवम् ॥”
वीरमित्रोदये ।
“नद्यां वा प्रक्षिपेद्भूयो यदा तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि न्यूनं सुखविवर्द्धनम् ॥”
इति बाणलिङ्गपरीक्षा ॥
बाणशब्दव्युत्पत्तिरपि तत्रैव ।
“अथ बाणं समाख्यातं यथा वक्ष्ये तथादितः ।
बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ॥
तेन यस्मै कृतं तस्माद्बाणलिङ्गमुदाहृतम् ।
सदा सन्निहितस्तत्र शिवः सर्व्वार्थदायकः ॥
कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।
पङ्कजस्य फलाकारं कुक्कुटस्य समाकृति ॥”
पङ्कजफलं पद्मबीजम् ॥ पक्वजम्बुफलाकारं कुक्कुटाण्डसमाकृतीति हेमाद्रिधृतलक्षणकाण्डे पाठः ।
“भुक्तिमुक्तिप्रदश्चैव बाणलिङ्गमुदाहृतम् ॥”
याज्ञवल्क्यसंहितायां देवीं प्रति शिववाक्यम् ।
“प्रशस्तं नार्म्मदं लिङ्गं पक्वजम्बुफलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ॥
हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते ।
स्वयं संस्रवते लिङ्गं गिरितो नर्म्मदाजले ॥
पुरा बाणासुरेणाहं प्रार्थितो नर्म्मदातटे ।
अविवासं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्थाज्जगतीतले ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्त्यो बाणलिङ्गैकपूजनात् ॥”
तथा ।
“ताम्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
वेदिका च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत् ॥
प्रत्यहं योऽर्च्चयेल्लिङ्गं नार्म्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ॥”
इति प्रत्यहबाणलिङ्गपूजाफलम् ॥
सूतसंहितायाम् ।
“संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रसलिङ्गे ततो बाणात् फलं कोटिगुणं स्मृतम् ॥
गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयो रसलिङ्गे स्युरणिमाद्याः सुसंस्थिताः ॥”
केदारखण्डे ।
“रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पुण्यानि सर्व्वकामप्रदानि च ॥
एतेषामपि सर्व्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ॥
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्व्वं पूजाकर्त्तुः प्रयच्छति ॥”
इति बाणलिङ्गप्रशंसा ॥
निन्द्यलिङ्गमाह तत्रैव ।
“कर्क्कशे बाणलिङ्गे तु पुत्त्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वस्थिते धेनुपुत्त्रदारधनक्षयः ।
शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च ॥
छिन्नलिङ्गेऽर्च्चिते बाणे विदेशगमनं भवेत् ।
लिङ्गे च कर्णिकां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अत्युन्नतिविलाग्रे तु गोधनानां क्षयो भवेत् ॥”
हेमाद्रिधृतम् ।
“तीक्ष्णाग्रं वक्रशीर्षञ्च त्र्यस्रलिङ्गं विवर्ज्जयेत् ।
अतिस्थूलं चातिकृशं स्वल्पं वा भूषणान्वितम् ।
गृही विवर्ज्जयेत्तादृक् तद्धि मोक्षार्थिनो हितम् ॥”
इति दुष्टबाणलिङ्गलक्षणम् ॥
शुभलिङ्गमाह वीरमित्रोदये ।
“अथैदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणाम् ।
लघु वा कपिलं स्थूलं गृही नैवार्च्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ।
तत्सपीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्व्वप्रसादपीठगम् ॥”
इति शुभबाणलिङ्गलक्षणम् ॥
सूतसंहितायां भैरववाक्यम् ।
“बाणासुरः पुरा भद्रे ! शिवस्यातीव वल्लभः ।
जितः क्रोधोऽनुरक्तश्च शिवपूजाविधौ रतः ॥
वह्निज्ञो निपुणश्चैव शिल्पज्ञो लक्षणान्वितः ।
दिने दिने स्वयं दत्त्वा लिङ्गं स्थाप्य प्रपूजयेत् ॥
एवं वर्षशतं देवि ! दिव्यमानेन पूजयेत् ।
तदा तद्भक्तिसुलभः प्रत्यक्षः शङ्करो भवेत् ॥
शङ्कर उवाच ।
तुष्टोऽहं तव हे बाण ! वरं ब्रूहि किमिच्छसि ।
शङ्करस्य वचः श्रुत्वा बाणो वचनमब्रवीत् ॥
यदि तुष्टोऽसि हीनाय मह्यं त्वं मन्दभागिने ।
क्लिष्टोऽहं तव देवेश ! लिङ्गं कृत्वा दिने दिने ॥
तत्तल्लक्षणसंसिद्धलक्षणं शास्त्रनिर्म्मितम् ।
शास्त्रार्थौ दुर्लभौ देव ! सिद्धस्यार्थश्च दुर्लभः ॥
तस्मात्त्वं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम् ।
सर्व्वकामकृतार्थञ्च सर्व्वसत्त्वानुकम्पनम् ।
सर्व्वेषाञ्च हितार्थाय प्रसादं कुरु शङ्कर ! ॥
इत्येवं वचनं तस्य शिवः परमकारणम् ।
श्रुत्वा कैलासमूर्द्धानं शङ्करेण विनिर्म्मिताः ॥
लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्द्दश ।
सिद्धलिङ्गं तदा तत्तु सर्व्वं सदोदयं स्वयम् ॥
अयोन्येवं सुसम्पूर्णं बाणस्य च समर्पितम् ॥
अक्षय्यफलदं बाणं स्थाप्यमानञ्च नित्यशः ।
संपूज्य बाणः सद्भावं कृत्वा प्रणयनन्तदा ॥
तद्भावं स्वपुरं नीत्वा नूनं चिन्तयते शुचिः ।
अक्षय्यं यदि संसिद्धं स्थाप्यमानं दिने दिने ॥
सत्त्वानां सिद्धिहेत्वर्थं बाणस्थाने सुसंश्रये ।
लिङ्गानां कालिकागर्त्ते स्थितास्तु त्रिकोटयः ॥
श्रीशैले कोटयस्तिस्रः कोट्येका कन्यकाश्रमे ।
माहेश्वरे च कोटिस्तु कन्यातीर्थे तु कोटिका ॥
महेन्द्रे चैव नेपाले एकैका कोटिरेव च ।
बाणार्च्चार्थं कृतं लिङ्गं बाणलिङ्गमतः स्मृतम् ॥
बाणो वा शिव इत्युक्तस्तत्कृतं बाणमुच्यते ॥
तस्मात्तेषु प्रदेशेषु पुण्यस्थानेषु तेषु वा ।
स्थितं तच्छिवसद्भावं शिवस्याकृतिविग्रहे ॥”
हेम्ना तदाकृतिलक्षणसमुच्चयेऽपि ।
“स्वयम्भुलिङ्गवद्बाणलिङ्गं भुक्त्यै स्वमुक्तये ।
सहस्रफलमन्यस्माद्यथा स्थापनपूजने ॥
श्रीशैले कालिकागर्त्ते लिङ्गाद्रौ कन्यकाश्रमे ।
कन्यातीर्थे वने याने महेन्द्रे वा सुरेश्वरे ॥
स्थितानि बाणलिङ्गानि शिवेनैव कृतानि तु ॥”
सिद्धान्तशेखरे बाणलिङ्गान्यधिकृत्य ।
“तदनेकप्रकारं स्यादन्यवर्णमपीठकम् ।
लक्ष्ममूर्त्तिविहीनञ्च बाणं तत् पृथुलाग्रकम् ॥”
बाणलिङ्गेष्वावाहनादि न कर्त्तव्यम् । तदुक्तं भविष्ये ।
“बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥” इति योगसारे पञ्चमपरिच्छेदे ।
“ब्राह्मे मुहूर्त्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्व्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥”
अथ बाणलिङ्गध्यानं तत्रैव ।
ॐ प्रमत्तं शक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।
कामबाणान्वितं देवं संसारदहनक्षमम् ॥
शृङ्गारादिरसोल्लासं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ॥
मनसा गन्धपुष्पाद्यैः संपूज्यास्य मनुं स्मरेत् ॥”
तथा ।
“प्राणायामं ततः कृत्वा बाणलिङ्गन्तु तोषयेत् ।
तदिष्टदेवयोरैक्यं विभाव्य वाग्भवं जपेत् ॥
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ॥”
अथ स्तवः ।
“ॐ बाणलिङ्ग महाभाग संसारात्त्राहि मां प्रभो !।
नमस्ते चोग्ररूपाय नमस्ते व्यक्तयोनये ॥
संसाराकारिणे तुभ्यं नमस्ते सूक्ष्मरूपधृक् ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ॥
दहनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कल्मषहारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ॥
बाणस्य वरदात्रे च रावणस्य क्षयाय च ।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च ॥
मुनीनां योगदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ऐं दाहिकाशक्तियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्व्वाय वैरिणां निग्रहाय च ॥
परित्राणाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ॥
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ॥
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय निष्ठाय शुद्धाय परमात्मने ॥
परमात्मस्वरूपाय लिङ्गमूलात्मकाय च ।
सर्व्वेश्वराय सर्व्वाय शिवाय निर्गुणाय च ॥
इत्येतत् परमं गुह्यं बाणलिङ्गस्य शङ्कर ! ।